# Shri Ramakarnamritam 2

# શ્રીરામકર્ણામૃતમ્ ૨

## Document Information

Text title : Shri Ramakarnamritam 2

File name : rAmakarNAmRRitam2.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# Shri Ramakarnamritam 2

# શ્રીરામકર્ણામૃતમ્ ૨

દિશતુ સ કુશલં જિતે દશાસ્યે
 વિધિવિહિતસ્તુતિવેદિતસ્વરૂપઃ ।
ઉપદિશતિ શિવો નૃણાં યદીયં
 મનુમવિમુક્તપુરે વિમુક્તિહેતોઃ ॥ ૧॥

વિહિતવિધિમપાસ્યતા નિષિદ્ધા-
 ન્યપિ ચરતાપ્યકૃતાક્ષનિગ્રહેણ ।
યદઘમુપચિતં મયા યતિષ્યે
 રઘુવરસંસ્મરણેન તન્નિમાર્ષ્ટુમ્ ॥ ૨॥

ચિરપરિચિતયા મનો વિકૃષ્ટં
 દિશિ દિશિ વાસનયા ન મે નિયામ્યમ્ ।
ઇતિ કવનપથે તવાર્ય રામ
 સ્મરણવિધાવનઘે કરોમ્યુપાયાન્ ॥ ૩॥

પ્રકૃતિરિતિ સરસ્વતીતિ લક્ષ્મી-
 રિતિ ગિરિજેતિ જગત્ત્રયીતિ વા યામ્ ।
ગદતિ મુનિગણઃ કવિત્વસિદ્ધ્યૈ
 કથમપિ તાં કલયે વિદેહકન્યામ્ ॥ ૪॥

મધુરભણિતયે પતિવ્રતાનાં
 મકુટમણિં કલયે મહીકુમારીમ્ ।
પતિકૃતરિપુપાતનપ્રતિજ્ઞા-
 દલનભયાદહિતેઽપ્યદત્તશાપામ્ ॥ ૫॥

હૃદય વિષયમેવ સેવસે કિં
 યદયમુદગ્રવિષોપમઃ ક્રમેણ ।
મદયતિ ચ નિહન્તિ ચ પ્રકામં
 તદયનમેત્ય ગિરા ભજસ્વ રામમ્ ॥ ૬॥

રઘુવરચરણારવિન્દભક્તિ-
    ચ્છલમકરન્દનિરન્તરાભિષિક્તાઃ ।
વકુલપરિમલા ગિરો મદીયાઃ
    કવિકુલકર્ણરસાયનાનિ સન્તુ ॥ ૭॥

ભરતવિદિતપાદુકાપ્રભાવં
    ધરતનુજારમણીયનામધેયમ્ ।
કરતલધૃતકાર્મુકં પુમાંસં
    મરતકનીલશરીરમાશ્રયામઃ ॥ ૮॥

નિટિલનયનનિર્વૃતિપ્રદાખ્યં
    કુટિલનિશાચરકુમ્ભિનાં મૃગેન્દ્રમ્ ।
કટિલસદસિમમ્બુદાભમેકં
    જટિલમુરીકૃતચાપબાણમીડે ॥ ૯॥

નિલયમખિલમઙ્ગલસ્ય રક્ષો-
    બલયવસપ્રબલાનિલાયિતાસ્ત્રમ્ ।
કલયતિ હૃદયં વિદેહકન્યા
    વલયપદાઙ્કિતકન્ધરં પુમાંસમ્ ॥ ૧૦॥

વિમોહયતિ વિષ્ટપત્રયજનાન્ ગુણારોપણ-
    ક્ષણત્રુટિતચણ્ડિકારમણચાપચણ્ડધ્વનિં (ધ્વનૌ) ।
જયત્યસકૃદુન્મિષત્પુલકયોરપેતત્રપં
    પરપસ્પરનિરીક્ષણં રઘુવરક્ષમાકન્યયોઃ ॥ ૧૧॥

કરોમિ હૃદયામ્બુજે કમપિ વીરમમ્ભોનિધે-
    ર્નિબન્ધનમપીન્ધન ? ? બન્ધુતૂણીશયમ્ ।
ન કશ્ચિદપિ દૃશ્યતે જગતિ યસ્ય શક્તો જયે
    સ્મરપ્રહિતજાનકીનયનપદ્મવાણં વિના ॥ ૧૨॥

ક એષ દલદુત્પલદ્યુતિરુદારવેષોજ્જ્વલઃ
    સ્વયં વિશતિ મે મનસ્ત્વરિતમાઃ પરિજ્ઞાયતે ।
સ એષ નનુ જાનકીકુચતટીપટીરદ્રવ-
    પ્રસક્તરસવાસનાઘુમુઘુમાયમાનઃ પ્રભુઃ ॥ ૧૩॥

ભજે શરધનુર્ધરં વિકટચિત્રકૂટાટવી-

ચરં કમપિ શઙ્કરપ્રણયિનીપ્રિયાખ્યં પ્રભુમ્ ।
સ્ફુટં કલિતકુઙ્કુમા વદતિ યસ્ય વક્ષસ્તટી
મૃગેન્દ્રરસિતત્રસજ્જનકજાહઠાલિઙ્ગનમ્ ॥ ૧૪॥

ચિરાય વિધુરસ્ય મે વિષયઘર્મઘોરાતપૈઃ
પયોદનિચયોદયપ્રતિનિધિઃ કિલેયં દશા ।
નરાધમુષિ રાઘવે યદધુના મનઃ પ્રીયતે
સમસ્તસુરમસ્તકપ્રણતિકર્મણિ બ્રહ્મણિ ॥ ૧૫॥

કટીઘટિતવલ્કલં ઘનલસજ્જટામણ્ડલં
કરાત્તશરકાર્મુકં કમલપત્રમિત્રેક્ષણમ્ ।
તમાલદલમેચકં ધરણિકન્યકાકામુકં
તરઙ્ગિતકૃપારસં તરણિવંશદીપં ભજે ॥ ૧૬॥

અચોદિતકુલક્રમં પુનરપૃષ્ટજાતિક્રિયં
નયાનયવિચારણાવિધુરમસ્તશઙ્કાકણમ્ ।
ઉપેયુષિ વિભીષણે ઝટિતિ દત્તમસ્યાભયં
મયેતિ સમુદીરિતા ભગવતો ગિરઃ પાતુ નઃ ॥ ૧૭॥

કલ્હારામ્બુજગન્ધિમન્દપવને ખેલન્મૃગાલઙ્કૃતે
કૂજત્કોકિલબાલચૂતગહને કૂલે સરય્વાઃ શુભે ।
પશ્ચાન્વેતિ શુકં શુકીતિ ચિબુકે ગૃહ્ણન્ કરેણ પ્રિયાં
ચિત્તે ભાતિ હિ કોઽપિ મે દશશિરોમત્તેભકણ્ઠીરવઃ ॥ ૧૮॥

કૂજત્કેકિનિ ચિત્રકૂટકટકે ગોદાવરીમેદુરે
પ્રત્યગ્રપ્રસવસ્ય કેસરતરોઃ પ્રચ્છાયશીતે તલે ।
કૌશેયાસ્તરણે વિદેહદુહિતુઃ કુર્વાણમઙ્કે શિરો
નીલામ્ભોદનિભં ભજે રઘુકુલપ્રાચીનભાગ્યં પ્રભુમ્ ॥ ૧૯॥

ત્રસ્તપ્રસ્થિતહંસયૂથમભિતો નૃત્યન્મયૂરવ્રજં
વલ્મીકાન્તરસંપ્રવિષ્ટભુજગં પઙ્ક્તીભવચ્ચાતકમ્ ।
પુષ્યન્નીપસિલીન્ધ્રકેતકજનસ્થાનાટવીમેયુષા
કાલિમ્ના મમ કેનચિત્ કવચિતં ચેતો વિરાધદ્વિષઃ ॥ ૨૦॥

સંરમ્ભસ્ખલિતોત્તરીયમવનિન્યસ્તાગ્રપાદામ્બુજા-
વુદ્યમ્ય શ્લથનીવિ પુષ્પનિચયં સઙ્ગૃહ્ણતીં જાનકીમ્ ।
પશ્યન્ પઞ્ચવટીવને મુહુરપિ પ્રચ્છન્ન એવાન્તિકે

હસ્તોપાત્તધનુશ્શરઃ સ્ફુરતિ મે ચિત્તે રઘુગ્રામણીઃ ॥ ૨૧॥

નિર્વૃત્તે ખરદૂષણત્રિશિરસામુન્મા(મૂ)લનાદાહવે
વૈદેહી પરિષસ્વજે સપદિ યં મૂર્તા જયશ્રીરિવ ।
ઉન્મીલત્પુલકશ્રમામ્ભસિ ધનુર્ન્યસ્તૈકહસ્તામ્બુજે
તસ્મિન્ સસ્મિતવક્ત્રચન્દ્રમસિ મે દેવે મનો ધાવતિ ॥ ૨૨॥

પાયાત્ પર્ણકુટીગતો ઘનઘટાસિક્તાવનીસૌરભ-
ઘ્રાણવ્યાપૃતપુષ્કરદ્વિપકુલે નીપપ્રસૂનાકુલે ।
કેકાકણ્ઠશિખણ્ડિતાણ્ડવપદે ખેલત્પુરોમારુતે
નન્દન્ પ્રાવૃષિ ચિત્રકૂટકટકે સીતાસખો રાઘવઃ ॥ ૨૩॥

અર્ધાવર્તિતમન્ત્રમર્ધવિરતસ્વાધ્યાયમર્ધોજ્ઝિત-
બ્રહ્મોપાસનમર્ધમુક્તહવનાતિથ્યાદિસર્વક્રિયમ્ ।
દૃષ્ટ્વા પઞ્ચવટીજુષો યમૃષયઃ સાર્થં તપો મેનિરે
કન્દર્પાદપિ સુન્દરં વ્રજતિ મે કાકુત્સ્થમેનં મનઃ ॥ ૨૪॥

ચારુસ્મેરમુખામ્બુજં ચરણયોર્મઞ્જુક્વણન્નૂપુરં
ચઞ્ચદ્રત્નલલન્તિકાલિકલસત્કસ્તૂરિકાચિત્રકમ્ ।
કાન્તવ્યાઘ્રનખાનુબન્ધિકનકગ્રૈવેયકાલઙ્કૃતં
કૌસલ્યાઙ્કવિભૂષણં કુવલયશ્યામં ભજામઃ શિશુમ્ ॥ ૨૫॥

દત્ત્વા પાર્શ્વજુષો વિદેહદુહિતુશ્ચાપં કરામ્ભોરુહે
ગુલ્ફદ્વન્દ્વનિવેશિતસ્ફિગવનૌ કુર્વન્ સમૌ જાનુની ।
દૃષ્ટ્યા કૂણિતયા કરામ્બુજયુગવ્યાસક્તમૂલાઞ્ચલં
પશ્યન્ બાણમૃજું ન વેત્તિ હૃદિ મે વીરોઽયમારોહતિ ॥ ૨૬॥

ઉન્મીલન્નવમઞ્જરીપરિમલોદઞ્ચદ્વિરેફારવૈ-
રારણ્યે તુલસીવને મુખરિતેઽદૃશ્યં શુકશ્યામલે ।
શશ્વલ્લીનમધીરદૃગ્વલયયા શશ્વદ્ગૃહીતં બલા-
જ્જાનક્યા સહ ચિત્રકૂટકટકે દેવં મનો ધ્યાયતિ ॥ ૨૭॥

સીતાદત્તકરામ્બુજં પદયુગશ્લિષ્યન્મણીપાદુકં
હર્ષાવેક્ષિવિહારબર્હ્યપસૃતાભ્યર્ણં ઘટોધ્ન્યા ગવા ।
સ્વામિન્ દેવ જયેતિ પઞ્જરશુકસ્વાનોલ્લસત્તોરણં
સાકેતાધિપતેરુષસ્યવતુ નઃ શય્યાગૃહાન્નિર્ગમઃ ॥ ૨૮॥

પાણૌ મુષ્ટિગૃહીતપન્નગલતાપર્ણોચ્ચયે બિભ્રતીં
    વામે રત્નકરણ્ડકં તદપરે વીટીં વિદેહાત્મજામ્ ।
પશ્યન્ કૂજતિ પાર્શ્વતઃ કલરવે દૃષ્ટ્યા તિરશ્ચીનયા
    મન્દસ્મેરમુખીં હૃદિ સ્ફુરતિ મે મઞ્ચાધિરૂઢઃ પ્રભુઃ ॥ ૨૯॥

શૈલાન્મત્તોઽવતરતિ કરિજર્યાસ્વનૈર્વારય ત્વં
    સૌમિત્રે મા ભવતુ ચકિતા જાનકીતિ પ્રહિણ્વન્ ।
તજ્જ્યાઘોષં મૃગપતિરવં વ્યાહરન્ વેપિતાઙ્ગ્યા
    ગાઢાશ્લિષ્ટો જનકસુતયા કૌસલેયોઽવતાન્નઃ ॥ ૩૦॥

હંસી મન્દં ચરતિ હરિણી વીક્ષતે લોલલોલં
    રસ્યં કૂજત્યયમિહ પિકો રાજતે બર્હિણોઽસૌ ।
ઇત્યાશ્ચર્યાદ્વનભુવિ વધૂં દર્શયન્તીં યદિ ત્વાં
    પશ્યામ્યેતૈરલમિતિ વદન્ પાતુ નઃ કૌસલેયઃ ॥ ૩૧॥

દેવ ત્વાં રઘુવીર નીરદનિભં સીતાતટિત્સઙ્ગતં
    કારુણ્યામૃતવર્ષિણં કતિપયે દૃષ્ટ્વા મયૂરા ઇવ ।
કિં નૃત્યન્તિ ન ચાતકા ઇવ પરે કિં વા ન માદ્યન્ત્યતઃ
    સ્વામિન્ પાલય પાલયેત્યહમપિ ક્રોશામિ મણ્ડૂકવત્ ॥ ૩૨॥

ખેલત્કેકિનિ સઞ્ચરન્ મૃગશિશૌ ચૂતસ્ફુરદ્વલ્કલે
    નીપન્યસ્તનિષઙ્ગધન્વનિ જનસ્થાનોટજપ્રાઙ્ગણે ।
સીતાં પુષ્પસમિત્કુશં હૃતવતીં સમ્ભાવયન્તં દૃશા
    બદ્ધસ્વસ્તિકમેણચર્મણિ ઘનચ્છાયં ભજેયં પ્રભુમ્ ॥ ૩૩॥

સંપ્રાપ્તો મૃગયાં વિધાય નલિનીપત્રાહૃતૈરમ્બુભિઃ
    સંક્ષાલ્યાંશુકપલ્લવેન કુચયોઃ પાદાબ્જમુન્માર્જતીમ્ ।
મૃષ્ટા નેહ મનશ્શિલેતિ વિસૃતાં રત્નાઙ્ગુલીયશ્રિયં
    વૈદેહીં પ્રતિ દર્શયન્ હૃદિ કૃતવ્યાજો વિભુઃ પાતુ નઃ ॥ ૩૪॥

શ્લથકચભરાન્નૈતદ્ભૂમૌ નિપાતય સુન્દરી-
    ત્યુદિતહસિતં સવ્રીડાયા મહીદુહિતુર્દિશન્ ।
વનતરુતલે મલ્લીપુષ્પૈઃ કૃતં નવગર્ભકં[1]
    દિનકરકુલોત્તંસો દેવોઽધિરોહતિ મે મનઃ ॥ ૩૫॥

Footnote

૧. ગર્ભકઃ = શિરોવૃતપુષ્પગુઞ્જા

દલિતદનુજાટોપે ચાપાધિરોપિતસાયકે
    મરતકમણિચ્છાયાદાયાદદાયિમહોભરે ।
પ્રણતજનતાપ્રાણત્રાણપ્રવીણપરાક્રમે
    સ્ફુરતિ પુરતોઽસ્માકં સીતાપતૌ દુરિતં કુતઃ ॥ ૩૬॥

અવિદિતનતક્લેશાનીશાનપાસ્ય દિશામહો
    સહ પરિહરત્ કાલીકેલીસખં મુરલીભૃતા ।
વનમૃગપરીવારે વીરે વરેણ્યધનુર્ધરે
    કુવલયદલશ્યામે રામે કુતૂહલિ મે મનઃ ॥ ૩૭॥

સ્ફટિકધવલાન્મેઘશ્યામે ગૃહીતમૃગાનલાત્
    ધૃતધનુરિષૌ ભૂતેશાનાત્ પ્લવઙ્ગમસેવિતે ।
મતિરવતરત્યાત્તવ્યાઘ્રાજિનાદ્ધૃતવલ્કલે
    શિખરિતનયાનાથાત્ પૃથ્વીસુતાપરિણેતરિ ॥ ૩૮॥

સ્વચ્છન્દં વ્રજસુન્દરીજનવિટાદ્બદ્ધૈકદારવ્રતે
    લીલાવેણુલસત્કરાત્ ત્રિભુવનત્રાણાય ચાપસ્પૃશિ ।
ચોરાકૃષ્ટવધૂજનાત્ પરિણતો કીટાદિમુક્તિપ્રદે
    વ્યાવૃત્તં મમ યાદવાદ્રઘુપતૌ ચેતઃ સ્વયં ધાવતિ ॥ ૩૧॥

કશ્ચિદ્બાલો મૃત્તિકાં ભક્ષયિત્વા
    કશ્ચિદ્બદ્ધશ્ચૂતમૂલે લુઠિત્વા ।
માં રક્ષેચ્ચેન્માસ્તુ તદ્યન્મમાસ્તે
    ત્રાતા સીતાકલિલોલો યુવૈકઃ ॥ ૪૦॥

અભિમતફલસિદ્ધ્યૈ ધ્યાતુમેકં સુરાણાં
    અનુસરતિ મનો મે યાવદાબદ્ધમેકમ્ ।
અપહરતિ નિરુન્ધન્નન્તરા તાવદેતત્
    કપિકુલપરિવારઃ કશ્ચિદમ્ભોદનીલઃ ॥ ૪૧॥

ક્ષણચલિતનિરૂઢસ્વર્ણદીકર્ણભૂષે
    પરિહૃતમયકન્યાપત્રલેખપ્રસઙ્ગે ।
વિરચિતસુરસુભ્રૂવિભ્રમપ્રાતિભાવ્યે
    કુતુકિતમતિભવ્યે ક્વાપિ કાલિમ્નિ ચેતઃ ॥ ૪૨॥

કચભરનિટિલભ્રૂકર્ણદૃઙ્નાસિકોષ્ઠ-

સ્તનજઘનનિતમ્બં પશ્યદન્યાઙ્ગનાનામ્ ।
મલિનયતિ મનશ્ચેન્મન્મથસ્તાવતા કિં
વિમલયિતુમહલ્યાપાવનોઽપ્યસ્તિ વીરઃ ॥ ૪૩॥

નવકુવલયદામશ્યામલઃ કોમલાઙ્ગ્યા
વિરચિતમધુરશ્રીરેકયા વિદ્યુતેવ ।
જલધર ઇવ કાલે જૃમ્ભમાણો મયૂરં
કુતુકયતિ મનો મે કોઽપિ કોદણ્ડભૂષઃ ॥ ૪૪॥

મનસિ મમ સમિન્ધે પુણ્યભાજામવેક્ષ્યઃ
કપિસદસિ મુનીનાં ચેતસાસ્વાદનીયઃ ।
જનકનૃપતિકન્યાસસ્પૃહાલિઙ્ગનાર્હઃ
શ્રુતિયુવતિકબર્યાઃ કોઽપિ સૌરભ્યસારઃ ॥ ૪૫॥

કુવલયદલનીલઃ કોઽપિ રક્ષોવધૂનાં
કુચગિરિષુ નિપાતં વાષ્પવૃષ્ટેર્વિધાતા ।
નિખિલભુવનચેતોબર્હિનૃત્તૈકહેતુઃ
શમયતિ મમ તાપં શાર્ઙ્ગવાનમ્બુવાહઃ ॥ ૪૬॥

નિગમશિખરિશ‍ૃઙ્ગાન્નિત્યમાગત્ય ખેલ-
ન્મુનિજનહૃદરણ્યે મોહસારઙ્ગમુક્તે ।
દશવદનગજેન્દ્રે દર્શિતાઘાતલીલો
વશયતિ રઘુસિંહો માનસં નઃ પ્રસન્નઃ ॥ ૪૭॥

કરયોઃ શરકાર્મુકાભિરામં
પદયોરશ્મવિવેકકૃત્પરાગમ્ ।
કલિતેષુધિમંસયોઃ પ્રભું તં
કરુણાપૂર્ણમપાઙ્ગયોરુપાસે ॥ ૪૮॥

અવલમ્બ્ય શરાસમદ્રિસારં
ગુણમાકૃષ્ય ઘનધ્વનિં વિમુઞ્ચન્ ।
વિશિખાનહિતેષુ રુક્મપુઙ્ખાન્
વિહરત્યાહવસીમ્નિ વીરરામઃ ॥ ૪૯॥

ચરમાઙ્ગનિબદ્ધચારુતૂણં
સુરમાઙ્ગલ્યધુરીણચાપબાણમ્ ।
અલિનીલમુપૈતિ માનસં મે

નલિનીનાયકવંશભાગધેયમ્ ॥ ૫૦॥

દૃશિ કારુણિકઃ કરે ધનુષ્માન્
કુશિકાપત્યમખસ્ય રક્ષિતા યઃ ।
રજનીચરતૂલચણ્ડવાતો
ભજનીયો મમ સોઽયમેક એવ ॥ ૫૧॥

નવનીરદનીલમાત્તચાપં
ભવનીહારરવિં શ‍ृણોતિ લોકઃ ।
અવનીતનયાસખં જગત્યા
સ્તવનીયં મમ દૈવમેકમેવ ॥ ૫૨॥

ભરિતા દયયા દૃશોઃ સુરાણાં
પરિતાપક્ષતયે ગૃહીતચાપા ।
દુરિતાનિ ધુનોતુ કાપિ લીલા-
ચ્છુરિતા ભૂમિસુતાકુચાઙ્ગરાગૈઃ ॥ ૫૩॥

સુરચારણસિદ્ધબદ્ધસેવઃ
શરચાપાભરણો નવામ્બુદશ્રીઃ ।
અહિમાંશુકુલાર્ણવેન્દુરેકો
મહિમાન્તઃકરણે મમાવિરસ્તુ ॥ ૫૪॥

ધનુષા સહ સાયકં દધાને
જનુષા ભૂષિતચણ્ડરશ્મિવંશે ।
કુચનમ્રમહીસુતાનુરક્તે
ક્વચન ન્યસ્તમિદં મહિમ્નિ ચેતઃ ॥ ૫૫॥

ભયકમ્પિતસાગરપ્રશસ્તે
મયકન્યાતનુમણ્ડનાસહિષ્ણૌ ।
નવગારુડરત્નભાસુરે સ્યા-
દવગાઢં હૃદયં ક્વચિત્ પ્રભૌ મે ॥ ૫૬॥

નિજનામરસજ્ઞનીલકણ્ઠં
ભજનાય પ્લવગાવૃતોપકણ્ઠમ્ ।
બલયન્ત્રિતસિન્ધુમન્તરેકં
કલયન્નન્યમુપાસિતું યતે કમ્ ॥ ૫૭॥

વિકટભ્રુકુટીન્ વિલોકતેઽરીન્
    વિશિખાન્ મુઞ્ચતિ વિગ્રહાન્ બિભર્તિ ।
અનુલિમ્પતિ શોણિતૈર્ધરિત્રીં
    રણરઙ્ગે રઘુપુઙ્ગવઃ સમિન્ધે (? ) ॥ ૫૮॥

સ્મયમાનમુખેન્દુરિન્દ્રનીલ-
    દ્યુતિરમ્ભોજદલેક્ષણો ધનુષ્માન્ ।
તરલીકૃતજાનકીદૃગન્ત-
    સ્તરુણઃ કશ્ચન મે મનો ધિનોતિ(ધુનોતિ) ॥ ૫૯॥

દલદુત્પલદામકોમલાઙ્ગી
    દશકણ્ઠાયુરપાયકાલભઙ્ગી ।
મનસે મમ રોચતેઽભિરૂપા
    કરુણા કાચિદુપાત્તબાણચાપા ॥ ૬૦॥

મૌલૌ નિધેહિ મકુટં ત્યજ બર્હિગર્હં
    બાણં ગૃહાણ ધનુષા સહ મુઞ્ચ વેણુમ્ ।
શાખામૃગૈર્વિહર સન્ત્યજ ગોપબાલાન્
    રામો યદૂદ્વહ ભવ ત્વમથાશ્રયે ત્વામ્ ॥ ૬૧॥

કૃષ્ણૈકસૂતરથકેતનભૂતદૂત
    આનૂરુસારથિરથાત્મજમિત્રભૂતઃ ।
પાણીશ ? ? રથસ્ય શરાસભૂતઃ
    કશ્ચિન્મનો હરતિ કાર્મુકભૂષણો મે ॥ ૬૨॥

દૃપ્યદ્દશાનનકલત્રકઠોરગર્ભ-
    વિભ્રંશવિભ્રમપરિસ્ફુટસાહસેન ।
ઘણ્ટા વિલુણ્ઠયતુ નઃ કલુષં રવેણ
    કોદણ્ડકોટિઘટિતા કુલદેવતાયાઃ ॥ ૬૩॥

દેવદ્વિષાં વિજયદેહભૃતાં શરણ્યં
    કારુણ્યભૂષિતકટાક્ષમુદગ્રચાપમ્ ।
ટઙ્ગ્રુટન્મરતકોપલરત્નનીલ-
    ધામ સ્મરામિ ધરણીતનયાસહાયમ્ ॥ ૬૪॥

આસ્તે કૃતાન્ત ઇતિ પાપિષુ દણ્ડધારી-
    ત્યાકર્ણ્યતે મુહુરવાપ્તપરમ્પરાભ્યઃ ।

રક્ષિષ્યતીતિ રઘુનન્દનમેવ સાક્ષા-
    દ્વિશ્વસ્ય કેવલમહં ન વિચિકિત્સિયામિ ॥ ૬૫॥

તિષ્ઠન્તુ દારુણતરા નિરયાઃ સહસ્રં
    તિષ્ઠન્તુ ઘોરચરિતા યમકિઙ્કરા વા ।
પાપાત્મનોઽપિ નિયતં પરિપાલનાય
    કોદણ્ડપાણિરિતિ કોઽપિ મમાસ્તિ નાથઃ ॥ ૬૬॥

લીલોપાત્તબલિપ્રસૂનમુકુલાઃ સ્નિગ્ધેન સૌમિત્રિણા
    વૈદેહીકરપલ્લવાત્તકલશીધારામ્બુસંવર્ધિતાઃ ।
દૃષ્ટા વત્સલયા દૃશા રઘુપતેઃ પુત્રા ઇવ પ્રત્યહં
    પ્રાયઃ પઞ્ચવટીકુટીરતરવઃ પ્રીણન્તિ મે માનસમ્ ॥ ૬૭॥

સૌવર્ણીમવસક્થિકામધિવસન્ પાર્શ્વસ્થપૃથ્વીસુતા
    હસ્તામ્ભોજયુગક્રમપ્રસૃતયા જાતિસ્રજા દીર્ઘયા ।
પાણિભ્યામપિ વેષ્ટયન્ કચભરં મૌલ્યેકપાર્શ્વો ચિતં
    દેવો મે હૃદિ ભાતિ દત્તનયનો દૃશ્યે તદેકસ્તને ॥ ૬૮॥

સ્વપ્નદૃષ્ટં શ્લોકાન્તરં–
ચાપસંહિતશરં ચરમાઙ્ગે
    બદ્ધતૂણમુપનીવિકૃપાણમ્ ।
વઞ્ચનામૃગવધાય વનાન્તે
    સઞ્ચરન્તમિમમન્તરુપાસે ॥ ૬૯॥

કોણપાધિપકદર્થિતામરી-
    કાઙ્ક્ષિતપ્રણયિબાણકાર્મુકમ્ ।
કઞ્ચન શ્રુતિકરણ્ડમૌક્તિકં
    કાલિમાનમવલોકયામહે ॥ ૭૦॥

જાનકીસ્તનતટૈકપાલિકા-
    જાતકુઙ્કુમવિભાગપિઞ્જરઃ ।
દૃશ્યતે હૃદિ દયાધુરન્ધરઃ
    કોઽપિ કોસલકુલીનકુઞ્જરઃ ॥ ૭૧॥

મામકે હૃદિ મહીકુમારિકા
    કામકેલિકુતુકી નૃપાત્મજઃ ।
 ? ? પદમસ્ત્રબન્ધુરો

નૂતનોદયપયોદસુન્દરઃ ॥ ૭૨॥

ચન્દ્રશેખરશરાસનચ્છિદા
ચાતુરીચણકરારવિન્દયા ।
સ્વીકૃતં મમ સુરાનુકૂલયા
? ? ભ્રનીલયા ॥ ૭૩॥

કૌણપાલિકદલીવિષાણિના
બાણચાપપરિકર્મપાણિના ।
ચણ્ડિકારમણચાપખણ્ડને
પણ્ડિતેન મમ મણ્ડિતં મનઃ ॥ ૭૪॥

તુન્નકીર્ણકુટિલક્ષપાચરે
કૃત્રિમેતરગિરામગોચરે ।
ધાવતે હિ કુલદેવતેતિ મે
ચિત્તમેવમિદમુત્તમે નૃણામ્ ॥ ૭૫॥

કાલિકાનિભરુચિઃ કનીયસા
કાન્તયા ચ સહ કલ્પિતાસિકા ।
કાર્મુકાશુગલસત્કરામ્બુજા
કાચિદસ્તિ કરુણા ગતિર્મમ ॥ ૭૬॥

મામકે મનસિ ધાન્યમાલિની-
ભૂષણાસહભુજોષ્મશાલિની ।
સા ચકાસ્તિ શરચાપધારિણી
ભાલુમાલિકુલભાગ્યધારિણી ॥ ૭૭॥

યાતિ તેજસિ મનઃ સનાતને
દૂતભૂષિતકિરીટિકેતને ।
યામિનીચરચમૂભયઙ્કરે
જાનકીનયનકેલિકિઙ્કરે ॥ ૭૮॥

ચક્રમાનુકૃતગન્ધસિન્ધુરા
સિન્ધુરાજકૃતસેતુબન્ધના ।
વાસનાધૃતશરાસનાશુગા
મેચકા મનસિ મે ચકાસ્તિ સા ॥ ૭૯॥

વાનરક્ષપિતરાક્ષસવ્રજં
    દીનરક્ષણવિચક્ષણં પ્રભુમ્ ।
શ્રીમદગ્ર્યશરચાપમેતિ મે
    જામદગ્ન્યમદનિગ્રહં મનઃ ॥ ૮૦॥

કણ્ઠેકાલશરાસખણ્ડનચણં કલ્યાણનાનાગુણં
    કારુણ્યાભરણં ખરાન્તકરણં કઞ્જાભિરામેક્ષણમ્ ।
પાણિદ્વન્દ્વગૃહીતબાણધનુષં પાથોદનીલત્વિષં
    પૌલસ્ત્યાસુમુષં ભજામિ પુરુષં પાર્શ્વે વધૂટીજુષમ્ ॥ ૮૧॥

કુવલયદલનીલશ્રીભૃતાં ભૂકુમારી-
    કુચકલશવિરાજત્કુઙ્કુમૈરઙ્કિતાનામ્ ।
દશમુખભુજતેજોદર્પતૂલાનિલાનાં
    દશરથસુકૃતાનાં દાસભાવં ભજામઃ ॥ ૮૨॥

કરધૃતશરચાપઃ કાન્તિમત્પઙ્કજાક્ષો
    નિહિતશરધિરંસે નીરદસ્નિગ્ધનીલઃ ।
વનમૃગપરિવારો વન્દનીયો મુનીનાં
    મદયતિ હૃદયં મે મૈથિલીપ્રાણનાથઃ ॥ ૮૩॥

મઘવદુપલનીલે મણ્ડલીકૃત્ય ચાપં
    મુહુરભિદશકણ્ઠં મુઞ્ચતીષુપ્રપઞ્ચમ્ ।
રણધરણિરજોભિર્ધૂસરે વાસરેશ-
    પ્રભવકુલભવાનામુત્તમે ચિત્તમેતિ ॥ ૮૪॥

શુભગુણકલકણ્ઠસ્તોમમાકન્દશાખા-
    નિયમિનિવહચેતોનીલકણ્ઠાભ્રરેખા ।
દશવદનવધૂટીચક્રવાકીત્રિયામા
    જનયતિ કુતુકં મે જાનકીપ્રેમસીમા ॥ ૮૫॥

તારુણ્યદર્પતરલીકૃતગોપકન્યા
    દૃષ્ટિપ્રિયં તવ યદસ્તિ વપુસ્તદાસ્તામ્ ।
કાકુત્સ્થવીર કમલાનયનાભિરામં
    ગાત્રં ત્વિદં તવ કરોતિ મુદં મદન્તઃ ॥ ૮૬॥

કલ્યાણમાવહતુ દાશરથેઃ કટાક્ષઃ
    શાખામૃગે શતમખાદપિ સાનુકમ્પઃ ।

આભાતિ ભૂમિતનયાધરબિમ્બલોભ-
    સમ્પાતસઙ્ક્રમિતલાક્ષ ઇવારુણો યઃ ॥ ૮૭॥

(રામં સુન્દરતયા મહાલક્ષ્મીશ્ચકમે ઇતિ પુરાણે કથાનુસન્ધેયા।)
સ કશ્ચન ગિરીન્દ્રજાસખશરાસનવ્રશ્ચકો
    મનો હરતિ મામકં મરતકોપલશ્યામલઃ ।
ધનુશ્શરલસત્કરો ધરણિકન્યકાપ્રેમભૂ-
    ર્ધનઞ્જયરથધ્વજાભરણભૂતદૂતઃ પ્રભુઃ ॥ ૮૮॥

ધન્યા વયં ધરણિકન્યકયા સનાથે
    નાથે સ્થિતે જગતિ નઃ પરિપાલનાય ।
યશ્શીલિતો યતિભિરાત્મનિ નિષ્કલઙ્કે
    લઙ્કેશ્વરં લવિતુમાપ મનુષ્યરૂપમ્ ॥ ૮૯॥

દીનાનુકમ્પિ દિવસેશ્વરવંશરત્નં
    કર્તૃવ્યપેતવચસાં કથમપ્યુપેયમ્ ।
તાપિઞ્છનીલરુચિ તામરસાયતાક્ષં
    ચાપોજ્જ્વલં કિમપિ વસ્તુ મમાવિરસ્તુ ॥ ૯૦॥

આબદ્ધતૂણમંસે કરકમલદ્વન્દ્વધૃતધનુર્બાણમ્ ।
પશ્યામિ હૃદયકમલે રામં દૂર્વાદલશ્યામ(લ)મ્ ॥ ૯૧॥

મજ્જતિ મનો મદીયં ક્વચિદપિ દલિતેન્દ્રમણિનીલે ।
મહિમનિ મહીકુમારીકુચકુડ્મલકુઙ્કુમાઙ્કિતોરસ્કે ॥ ૯૨॥

જગદઘહરપ્રશંસે જનકસુતાવલયપદવિલસદંસે ।
નિગમાન્તનલિનહંસે રમતે મમ હૃદયં રવિકુલવતંસે ॥ ૯૩॥

સરસઘનસારમેદુરચન્દનનિષ્યન્દશીતલાલોકમ્ ।
કમપિ દલિતમયકન્યામઙ્ગલમાલિઙ્ગતિ મનો મે ॥ ૯૪॥

વિકચેન્દીવરનીલં વિદેહતનયાકુચસ્તબકલોલમ્ ।
નિગમાન્તસુધાનિલયં માધુર્યં પિબતિ મામકં હૃદયમ્ ॥ ૯૫॥

ગિરિશધનુસ્તરુકરિણં ગલિતભૃગુપ્રવરગર્વસર્વસ્વમ્ ।
કલયામિ કમપિ વીરં કૃત્તકબન્ધં કૃતામ્બુનિધિબન્ધમ્ ॥ ૯૬॥

કુશિકસુતકુતુકદાયી કુવલયદલનીલકોમલશરીરઃ ।
કોસલકુલતિલકો મે કોઽપિ ગતિઃ કોવિદારરથકેતુઃ ॥ ૯૭॥

કુવલયદામસરૂપં કુણ્ઠિતદશકણ્ઠનિરુપમાટોપમ્ ।
કરતલગૃહીતચાપં કલયે તદ્ધામ પામરદુરાપમ્ ॥ ૯૮॥

દલિતેન્દીવરરૂપે દર્શિતદશકણ્ઠયૌવતવિલાપે ।
ધૃતશરચાપકલાપે દીવ્યતિ હૃદયં દિલીપકુલદીપે ॥ ૯૯॥

નિગમાન્તવનકુરઙ્ગે નિર્મલમુન્યન્તરઙ્ગનટરઙ્ગે ।
રુચિતુલિતરવિતુરઙ્ગે ક્વચન રમે રઘુકુલાર્ણવતરઙ્ગે ॥ ૧૦૦॥

ઇતિ શ્રીરામકર્ણામૃતં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramakarnamritam 2*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*